# अध्यायः ७

# ज्ञानविज्ञानयोगः

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना। श्रद्धावान्भजते यो मां स मे युक्ततमो मतः।। ६-४७ ।। इति

प्रश्नबीजमुपन्यस्य स्वयमेव ईदृशं मदीयं तत्वमेवं मद्गतान्तरात्मा स्यादिति एतद्विवक्षुः -

**श्रीभगवानुवाच।**

**मय्यासक्तमनाः पार्थ योगं युञ्जन् मदाश्रयः।**

**असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु।। १ ।।**

पार्थ मयि आसक्तमनाः मदाश्रयः (सन्) योगं युञ्जन् समग्रं मां असंशयं यथा ज्ञास्यसि तत् शृणु।। १ ।।

*Śrī Bhagavān* said:
O *Pārtha*, please listen to the way in which you will know Me totally, without any doubt, by taking to *yoga,* with a mind committed to Me and having surrendered to Me. 1

**मयि** वक्ष्यमाणविशेषणे परमेश्वरे **आसक्तं** **मनो** यस्य स मय्यासक्तमनाः हे **पार्थ** **योगं** **युञ्जन्**

मनःसमाधानं कुर्वन् **मदाश्रयः** अहमेव परमेश्वरः आश्रयः यस्य सः मदाश्रयः यो हि कश्चित् पुरुषार्थेन

केनचिद् अर्थी भवति स तत्साधनं कर्म अग्निहोत्रादि तपः दानं वा किंचित् आश्रयं प्रतिपद्यते अयं तु

योगी मामेवआश्रयं प्रतिपद्यते हित्वा अन्यत्साधनान्तरं मयि एव आसक्तमना भवति। यः त्वम् एवंभूतः

सन् **असंशयं** **समग्रं** समस्तं विभूतिबलशक्त्यैश्वर्यादिगुणसंपन्नं **मां** **यथा** येन प्रकारेण **ज्ञास्यसि**

संशयमन्तरेण एवमेव भगवान् इति **तच्छृणु** उच्यमानं मया।। १।

तच्च मद्विषयम्   -

**ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः।**

**यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते।। २ ।।**

अहं ते इदं सविज्ञानं ज्ञानम् अशेषतः वक्ष्यामि। यद् ज्ञात्वा इह भूयः अन्यद् ज्ञातव्यम् न अवशिष्यते।। २ ।।

I will teach you without any omission, this knowledge, along with immediate knowledge, knowing which, there is nothing more than this remaining here to be known. 2

**ज्ञानं** **ते** तुभ्यम् **अहं** **सविज्ञानम्** विज्ञानसहितं स्वानुभवयुक्तम् **इदं** **वक्ष्यामि** कथयिष्यामि **अशेषत**ः

कार्त्स्न्येन। तज्ज्ञानं विवक्षितं स्तौति श्रोतुः अभिमुखीकरणाय। **यज्ज्ञात्वा** यज्ज्ञानं ज्ञात्वा **नेह** **भूय**ः पुनः

**ज्ञातव्यं** पुरुषार्थसाधनम् **अवशिष्यते** नावशेषः भवति इति मत्तत्वज्ञः यः स सर्वज्ञः भवति इत्यर्थः ।

अतो विशिष्टफलत्वाद् दुर्लभं ज्ञानम्। । २ ।।

**[1]मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये।**

**यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः।। ३ ।।**

मनुष्याणां सहस्रेषु कश्चित् सिद्धये यतति। यतताम् सिद्धानां अपि कश्चिद् मां तत्त्वतः वेत्ति ।। ३ ।।

Among thousands of people, a rare person makes effort for *mokṣa*. Even among those seekers making effort, (only) a rare person comes to know Me in reality. 3

कथमित्युच्यते - **मनुष्याणां** मध्ये **सहस्रेषु** अनेकेषु **कश्चिद्** **यतति**[2] प्रयत्नं करोति **सिद्धये** सिद्ध्यर्थं तेषां **यततामपि** सिद्धानां सिद्धाः एव हि ते ये मोक्षाय यतन्ते तेषां **कश्चिदेव** **मां** **वेत्ति** **तत्त्वतः** यथावत्। । ३ ।।

---

[1]Góti *2-16*

[2] अनुदात्त-इत्-निमित्त-आत्मनेपदत्वस्य अनित्यत्वज्ञापकः । अनुदात्त-इत् इति आत्मनेपदत्वे सिद्धे चक्षिङ् इति ङित्वमनर्थकम्। तस्मात् अनित्यत्वसिद्धिः।

[3]श्रोतारं प्ररोचनेन अभिमुखीकृत्य आह -

**भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।**

**अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा।। ४ ।।**

भूमिरापोऽनलो वायुः खं मनो बुद्धिः अहंकारः च इति एव इयं मे अष्टधा भिन्ना प्रकृतिः ।। ४ ।।

Earth, water, fire, air, space, mind, intellect and indeed the sense of doership — thus this *prakṛti* of mine is divided in an eight-fold way. 4

**भूमिः** इति पृथिवीतन्मात्रमुच्यते न स्थूला, भिन्ना प्रकृतिरष्टधा[4] इति वचनात्।

तथा अबादयोऽपि तन्मात्राण्येव उच्यन्ते।

---

[3] *Gītā* *6-40*

[4] मूलप्रकृतिरविकृतिः महदाद्याः प्रकृतिविकृतयस्सप्त। षोडशकश्च विकारो न प्रकृतिः न विकृतिः पुरुषः। इति साङ्ख्यशास्त्राच्च मूलप्रकृतेः महदहङ्कारपञ्चतन्मात्राणां च प्रकृतीनां सप्तानां प्रकृतिपदवाच्यत्वम्। प्रकृतिः उपादानं जनिकर्तुः प्रकृतिः इति पाणिनिसूत्रात्। विकृतिः कार्यम्। मायायाः प्रकृतित्वम्। विकारशोडशककारणत्वाद् मूलप्रकृतिकार्यत्वाच्च महदादिसप्तकस्य (महत् हिरण्यगर्भः। अहङ्कारः अव्यक्तम्) प्रकृतित्वं विकृतित्वं च इति। भूतपञ्चकम् इन्द्रियदशकं मनश्च इति विकारशोडशकम्। तस्य तु कार्यत्वमेव न तु कारणत्वम्। यद्यपि भौतिकान् देहान् प्रति भूतानां स्थूलानाम् अप्यस्ति कारणत्वं तथापि देहानां तत्वेषु अप्रवेशात् तत्वानामेव परस्परकार्यकारणभावस्य तत्र विवक्षितत्वात्। यद्धि प्रलये अपि न नश्यति तदेव हि तत्वं इति साङ्ख्यानामभिमतम्। (शारीरके प्रकृत्यादीनां ब्रह्मणः पृथक्त्वं दूषितं न तु प्रकृत्यादीनां स्वरूपमेव निषिद्धम्।)

**आपः** **अनलः** **वायुः** **खं** **मन** इति मनसः कारणमहङ्कारः गृह्यते ।

**बुद्धिः** इति अहङ्कारकारणं महत्तत्वम् ।

**अहंकार**: इति अविद्यासंयुक्तम् अव्यक्तम् ।

यथा विषसंयुक्तमन्नं विषमुच्यते एवम् अहङ्कारवासनावद् अव्यक्तं मूलकारणमहङ्कार इत्युच्यते

प्रवर्त्तकत्वाद् अहङ्कारस्य। अहङ्कारः एव हि सर्वस्य प्रवृत्तिबीजं दृष्टं लोके।

**इतीयं** यथोक्ता **प्रकृतिः** **मे** मम ऐश्वरी माया शक्तिः **अष्टधा** **भिन्ना** भेदमागता। । ४ ।।

**[5][6]अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्।**

**जीवभूतां महाबाहो ययेदं धार्यते जगत्।। ५ ।।**

महाबाहो इयम् (पूर्वोक्ता अष्टधा भिन्ना प्रकृतिः) अपरा । इतः तु अन्यां जीवभूतां मे परां प्रकृतिं विद्धि यया इदं जगत् धार्यते। ५ ।।

O Mighty armed, (*Arjuna*), this is (my) lower (*prakṛti*). Whereas, please understand the one other than this, my higher *prakṛti* (my very nature), which is the essential nature of the individual, by which this world is sustained. 5

**अपरा** न परा निकृष्टा अशुद्धा अनर्थकरी संसारबन्धनात्मिका **इयम्** **इत**: अस्याः यथोक्तायाः तु अन्यां

विशुद्धां **प्रकृतिं** मम आत्मभूतां **विद्धि** **मे** **परां** प्रकृष्टां **जीवभूतां** क्षेत्रज्ञलक्षणां प्राणधारणनिमित्तभूतां

हे **महाबाहो** **यया** प्रकृत्या **इदं** **धार्यते** **जगत्** अन्तःप्रविष्टया।। ५ ।।

---

[5] *Māṇḍūkyopaniṣad*

[6] *Alaṃ na vidyate yasya   the one who never says enough (in terms of fuel)*

**[7]एतद्योनीनि भूतानि सर्वाणीत्युपधारय।**

**अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा।। ६ ।।**

सर्वाणि भूतानि एतद् योनीनि इति उपधारय। अहं कृत्स्नस्य जगतः प्रभवः तथा प्रलयः ।। ६ ।।

Please understand that all beings and elements have their cause in this two-fold *prakṛti*. (Therefore,) I am the one from whom this entire world comes; so too, I am the one into whom everything resolves. 6

**एतद्योनीनि** एते परापरे क्षेत्र-क्षेत्रज्ञलक्षणे प्रकृती योनिः येषां भूतानां तानि एतद्योनीनि **भूतानि** **सर्वाणि** **इति** एवम् **उपधारय** जानीहि। यस्माद् मम प्रकृती योनिः कारणं सर्वभूतानाम् अतः **अहं** **कृत्स्नस्य** समस्तस्य **जगतः** **प्रभवः** उत्पत्तिः **प्रलयः** विनाशः **तथा** प्रकृतिद्वयद्वारेण अहं सर्वज्ञः ईश्वरः जगतः कारणमित्यर्थः।। ६ ।।

89 यतस्तस्मात्

---

[7] *Gītā* *13-2*

**मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय।**

**मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव।। ७ ।।**

धनञ्जयमत्तः परतरम्अन्यत् किञ्चित्न अस्तिसूत्रेमणिगणाः इवमयिइदम् सर्वम् प्रोतम् धनञ्जय मत्तः परतरं अन्यत् किञ्चिद् न अस्ति । इदं सर्वम् सूत्रे मणिगणा इव मयि प्रोतम् ।। ७ ।।

O *Dhanañjaya*, there is no other cause superior to Me. All this is woven (has its being) in Me, like the beads in a string. 7

**मत्तः** परमेश्वरात् **परतरं** **अन्यत्** कारणान्तरं **किञ्चिद्** **न अस्ति** न विद्यते अहमेव जगत्कारणम्

इत्यर्थः। हे **धनञ्जय** यस्मादेवं तस्माद् **मयि** परमेश्वरे सर्वाणि भूतानि **सर्वमिदं** जगत् **प्रोतम्**

अनुस्यूतम् अनुगतमनुविद्धं ग्रथितमित्यर्थः। दीर्घतन्तुषु पटवत्। **सूत्रे** च **मणिगणा** **इव**।। ७ ।।

[8] *ete yonī yeṣām te – etadyonīni.*

[9] यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति।

केन केन धर्मेण विशिष्टे त्वयि सर्वमिदं प्रोतमिति   उच्यते -

**रसोऽहमप्सु कौन्तेय प्रभास्मि शशिसूर्ययोः।**

**प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु।। ८ ।।**

कौन्तेय अहम् अस्मिअप्सु रसः शशि-सूर्ययोःप्रभासर्ववेदेषु प्रणवःखेशब्दःनृषुपौरुषम् कौन्तेय अहम् अप्सु रसः। शशिसूर्ययोः प्रभा अस्मि। सर्ववेदेषु प्रणवः (अस्मि)। खे शब्दः (अस्मि)। नृषु पौरुषम् (अस्मि) ।। ८ ।।

O *Kaunteya*, I am the taste in the water; I am the light in the moon and the sun; I am *Om* in all the Vedas; I am sound in the space; and I am the strength in human beings. 8

**रसोऽहम्** अपां यः सारः स रसः तस्मिन् रसभूते मयि आपः प्रोताः इत्यर्थः। एवं सर्वत्र।

यथा अहमप्सु रसः (जलत्वम्) एवं **प्रभास्मि** **शशिसूर्ययो**ः । **प्रणव**ः ओङ्कारः **सर्ववेदेषु** तस्मिन्

प्रणवभूते मयि सर्वे वेदाः प्रोताः। तथा **खे** आकाशे **शब्द**ः सारभूतः तस्मिन् मयि खं प्रोतम्।

तथा **पौरुषं** पुरुषस्य भावः (वीर्यम्) यतः पुंबुद्धिः नृषु तस्मिन् मयि पुरुषाः प्रोताः। ।। ८ ।।

**पुण्यो गन्धः पृथिव्यां च तेजश्चास्मि विभावसौ।**[10]

**जीवनं सर्वभूतेषु तप□ास्मि तपस्विषु।। ९ ।।**

पृथिव्याम् चपुण्यः गन्धः विभावसौ चतेजस्अस्मि सर्वभूतेषुजीवनम्च तपस्विषु तपस् अस्मि पृथिव्यां पुण्यः गन्धः च अस्मि। विभावसौ तेजः च (अस्मि) । सर्वभूतेषु जीवनं (च) अस्मि। तपस्विषु तपः च (अस्मि) ।। ९ ।।

And I am the sweet fragrance in the earth and the brilliance and heat in the fire. I am the very life in all beings and the ascetic disciplines and their results in the ascetics. 9

**पुण्यः** सुरभिः **गन्धः** **पृथिव्यां** **च** अहमस्मि। तस्मिन् मयि गन्धभूते पृथिवी प्रोता। पुण्यत्वं गन्धस्य

स्वभावतः एव पृथिव्यां दर्शितम् अबादिषु रसादेः पुण्यत्वोपलक्षणार्थम्। अपुण्यत्वं तु गन्धादीनां

अविद्याधर्माद्यपेक्षं संसारिणां भूतविशेषसंसर्गनिमित्तं भवति । **तेज**श्च दीप्तिश्च **अस्मि विभावसौ** अग्नौ।

तथा **जीवनं सर्वभूतेषु** येन जीवन्ति सर्वाणि भूतानि तज्जीवनम् ।

**तपः** **च** **अस्मि** **तपस्विषु** तस्मिन् तपसि मयि तपस्विनः प्रोताः।। ९ ।।

---

[10] *Kaṭhopaniṣad* प्र..

**बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम्।**

**बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम्।। १० ।।**

पार्थमाम्सर्वभूतानाम्सनातनम् बीजम्विद्धि बुद्धिमताम्बुद्धिः तेजस्विनाम्तेजस् अहम् अस्मिपार्थ मां सर्वभूतानां सनातनं बीजं विद्धि । (अहं) बुद्धिमतां बुद्धिः अस्मि। अहं तेजस्विनां तेजः अस्मि।। १० ।।

O *Pārtha*, (*Arjuna*), understand Me as the one who is the eternal seed in all beings. I am the intellect of those that have the capacity to discriminate; I am the brilliance in the brilliant. 10

**बीजं** प्ररोहकारणं **मां** **विद्धि** **सर्वभूतानां** हे **पार्थ** **सनातनं** चिरन्तनम्।

किं च **बुद्धिः** विवेकशक्तिः अन्तःकरणस्य **बुद्धिमतां** विवेकशक्तिमताम् अस्मि।

**तेजः** प्रागल्भ्यं तद्वतां **तेजस्विनामहम्**।। १० ।।

**बलं बलवतां चाहं कामरागविवर्जितम्।**

**धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ।। ११ ।।**

च भरतर्षभबलवताम्काम-राग-विवर्जितम्बलम् भूतेषुधर्म-अविरुद्धःकामः अहम् अस्मिभरतर्षभ अहं बलवतां च कामरागविवर्जितं बलम्। भूतेषु धर्माविरुद्धः कामः अस्मि ।। ११ ।।

And in the strong, I am the strength that is free from desire and attachment. In all beings, I am the desire that is not opposed to *dharma*, O the foremost in the clan of *Bharata*! 11

**बलं** सामर्थ्यं ओजः **बलवताम्** **अहं** तच्च बलं **कामरागविवर्जितम्** कामश्च रागश्च कामरागौ कामः

तृष्णा असन्निकृष्टेषु विषयेषु रागः रञ्जना प्राप्तेषु विषयेषु ताभ्यां विवर्जितं देहादिधारणमात्रार्थं बलं सत्वम्

अहमस्मि न तु यत्संसारिणां तृष्णारागकारणम्।

किं च **धर्माविरुद्धः** धर्मेण शास्त्रार्थेन अविरुद्धः यः प्राणिषु **भूतेषु** **काम**ः यथा देहधारणमात्राद्यर्थः

अशनपानादिविषयः स कामः अस्मि हे **भरतर्षभ**।। ११ ।।

**ये चैव सात्त्विका भावा राजसास्तामसाश्च ये।**

**मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि।। १२ ।।**

ये चएव सात्त्विका:भावा:ये चराजसा: च तामसा:तान्मत्त: एवइतिविद्धि ते मयितु न अहम्तेषु ये च सात्त्विका: एव भावा: ये राजसा: (ये) तामसा: च तान् मत्त: एव इति विद्धि। अहं तेषु न । ते तु मयि ।। १२ ।।

And those beings and things which are indeed born of *sattva*, *rajas*, and *tamas*, may you know them to be born from Me alone. They are in Me but I am not in them. 12

किं च। **ये** **चैव** **सात्त्विका**: सत्वनिर्वृत्ता: **भावा**: पदार्था: **राजसा**: रजोनिर्वृत्ता: **तामसा**: तमोनिर्वृत्ता:

**च**। **ये** केचित् प्राणिनां स्वकर्मवशाज्जायन्ते भावा: **तान्** **मत्त** **एव** जायमानान् **इति** एवं **विद्धि** सर्वान्

समस्तान् एव।

यद्यपि ते मत्त: जायन्ते तथापि **न** **तु** **अहं** **तेषु** तदधीन: तद्वश: यथा संसारिण:, **ते** पुन: **मयि** मद्वशा:

मदधीना: ।। १२ ।।

एवंभूतमपि परमेश्वरं नित्यशुद्धबुद्धमुक्तस्वभावं सर्वभूतात्मानं निर्गुणं संसारदोषबीजप्रदाहकारणं मां

नाभिजानाति जगद् इति अनुक्रोशं दर्शयति भगवान्। तच्च किंनिमित्तं जगतः अज्ञानमित्युच्यते -

**त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत्।**

**मोहितं नाभिजानाति मामेभ्यः परमव्ययम्।। १३ ।।**

एभिः भावैः त्रिभिः गुण-मयैः सर्वम् इदम् जगत् मोहितम् माम् एभ्यः परम् अव्ययम् न अभिजानाति इदम् सर्वं जगत्
एभिः गुणमयैः त्रिभिः भावैः मोहितं (सत्) एभ्यः परम् अव्ययं मां न अभिजानाति ।। १३ ।।

This entire world (of human beings), deluded by these things, which are the modifications of the three qualities, does not know Me who is changeless, distinct from, and beyond these (modifications of the *guṇas*). 13

**त्रिभिर्गुणमयैः** विकारैः रागद्वेषमोहादिप्रकारैः **भावैः** पदार्थैः **एभिः** यथोक्तैः **सर्वमिदं** प्राणिजातं **जगत्**

**मोहितं** अविवेकतामापादितं सन् **न अभिजानाति** **मामेभ्यः** यथोक्तेभ्यः गुणेभ्यः **परं** व्यतिरिक्तं विलक्षणं

च **अव्ययं** व्ययरहितं जन्मादिसर्वभावविकारवर्जितमित्यर्थः।। १३ ।।

कथं पुनः दैवीम् एतां त्रिगुणात्मिकां वैष्णवीं मायाम् अतिक्रामन्ति इति उच्यते -

**दैवी ह्येषा गुणमयी मम माया दुरत्यया।**

**मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते।। १४ ।।**

हि एषा गुणमयी मम दैवी माया दुरत्यया। ये माम् एव प्रपद्यन्ते ते एतां मायां तरन्ति ।। १४ ।।

Indeed this My *māyā,* which is in the form of the modification of the three *guṇas*, which belongs to Me, (the Lord), is difficult to cross. Those who seek only Me, they cross this *māyā*. 14

**दैवी** देवस्य परमेश्वरस्य विष्णोः स्वभूता हि यस्माद् **एषा** यथोक्ता **गुणमयी** **मम** **माया** **दुरत्यया** दु:खेन

अत्ययः अतिक्रमणं यस्याः सा दुरत्यया।

तत्र एवं सति, सर्वधर्मान् परित्यज्य **मामेव** मायाविनं स्वात्मभूतं सर्वात्मना **ये** **प्रपद्यन्ते** **ते** **मायामेतां**

सर्वभूतमोहिनीं **तरन्ति** अतिक्रामन्ति संसारबन्धनाद् मुच्यन्ते इत्यर्थः।। १४ ।।

[11] यदि त्वां प्रपन्नाः मायामेतां तरन्ति कस्मात् त्वामेव सर्वे न प्रपद्यन्ते इति उच्यते -

**न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः।**

**माययापहृतज्ञाना आसुरं भावमाश्रिताः।। १५ ।।**

दुष्कृतिनः मूढाः नराधमाः मायया अपहृतज्ञानाः आसुरं भावमाश्रिताः (सन्तः) मां न प्रपद्यन्ते ।। १५ ।।

Those who do wrong actions, who are deluded and the lowest among men do not seek Me. Robbed of their discrimination by *māyā*, they have resorted to the condition of those who revel in sense pursuits. 15

**न मां** परमेश्वरं नारायणं **दुष्कृतिन**ः पापकारिणः **मूढाः** **प्रपद्यन्ते** **नराधमा**ः नराणां मध्ये अधमाः

निकृष्टाः ते च **मायया** **अपहृतज्ञाना**ः सम्मुषितज्ञानाः **आसुरं** **भावं** हिंसानृतादिलक्षणम् **आश्रिता**ः।। १५

।।

[11] कलौ कल्मष-चित्तानां पापद्रव्योपजीविनाम्।
विधिक्रियाविहीनानां हरेर्नामैव केवलम्।।

ये पुनः नरोत्तमाः पुण्यकर्माणः -

**चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन।**

**आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ।। १६ ।।**

भरतर्षभ अर्जुन आर्त्तः अर्थार्थी जिज्ञासुः ज्ञानी च (इति) चतुर्विधाः सुकृतिनः जनाः मां भजन्ते ।। १६ ।।

O *Arjuna*, the people, given to good actions who worship me are four-fold. They are, the one in distress, the one who wants security and pleasure, the one who wishes to know (Me), and the one who knows (Me), O foremost in the family of *Bharata*! 16

**चतुर्विधाः** चतुष्प्रकाराः **भजन्ते** सेवन्ते **मां जना**ः **सुकृतिन**ः पुण्यकर्माणः हे **अर्जुन** **आर्त्त**ः

आर्त्तिपरिगृहीतः तस्कर-व्याघ्र-रोगादिना अभिभूतः आपन्नः **जिज्ञासु**ः भगवत्तत्वं ज्ञातुमिच्छति यः

**अर्थार्थी** धनकामः **ज्ञानी** विष्णोः तत्ववित् **च भरतर्षभ** ।। १६ ।।

**तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते।**

**प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः।। १७ ।।**

तेषां नित्ययुक्तः एकभक्तिः ज्ञानी विशिष्यते। अहं ज्ञानिनः अत्यर्थं प्रियः हि। सः च मम प्रियः।। १७ ।।

Among these, the *jñānī*, always united (to me), his devotion resolved in oneness, is distinguished because I am totally beloved to him and he is absolutely My beloved. 17

**तेषां** चतुर्णां मध्ये **ज्ञानी** तत्वविद् तत्वविद्त्वाद् **नित्ययुक्तः** भवति, **एकभक्तिः** च अन्यस्य भजनीयस्य

अदर्शनाद् अतः स एकभक्तिः **विशिष्यते** विशेषमाधिक्यमापद्यते अतिरिच्यते इत्यर्थः।

**प्रियो हि** यस्माद् अहमात्मा **ज्ञानिनः** अतः तस्य **अहम्** **अत्यर्थं** प्रियः। प्रसिद्धं हि लोके आत्मा प्रियः

भवति इति । तस्माद् ज्ञानिनः आत्मत्वाद्, वासुदेवः प्रियः भवति इत्यर्थः ।

**स च** ज्ञानी **मम** वासुदेवस्य आत्मा एव इति ममात्यर्थं **प्रियः** ।। १७ ।।

न तर्हि आर्तादयः त्रयः वासुदेवस्य प्रियाः।

न।

किं तर्हि -

**उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम्।**

**आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम्।। १८ ।।**

एते सर्वे उदाराः एव। ज्ञानी तु आत्मा एव (इति) मे मतम्। हि स युक्तात्मा (सन्) माम् एव अनुत्तमां गतिम् आस्थितः।। १८ ।।

All these indeed are exalted, but the one who knows (Me) is myself alone. This is My vision. Because he, the one whose mind is absorbed in Me, has reached Me alone, the end beyond which there is no end. 18

**उदारा**ः उत्कृष्टाः **सर्वे एव एते** त्रयः अपि मम प्रियाः एव इत्यर्थः।

न हि कश्चिन्मद्भक्तः मम वासुदेवस्य अप्रियः भवति।

ज्ञानी[12] तु अत्यर्थं प्रियः भवति इति विशेषः।

तत्कस्माद् इत्याह - ज्ञानी त्वात्मैव नान्यः मत्तः इति मे मम मतं नि□यः।

**आस्थित**ः आरोढुं प्रवृत्तः स ज्ञानी हि यस्माद् अहमेव भगवान् वासुदेवः नान्यः अस्मि इत्येवं **युक्तात्मा**

समाहितचित्तः सन् मामेव परं ब्रह्म गन्तव्यम् अनुत्तमां गतिं गन्तुं प्रवृत्तः इत्यर्थः।। १८ ।।

---

12

ज्ञानी पुनरपि स्तूयते -

**बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते।**

**वासुदेवः सर्वमिति स महात्मा सुदुर्लभः।। १९ ।।**

(पुरुषः) बहूनां जन्मनामन्ते वासुदेवः सर्वमिति ज्ञानवान्सन् मां प्रपद्यते (यद्वा (पुरुषः) बहूनां जन्मनामन्ते ज्ञानवान्सन् वासुदेवः सर्वमिति मां प्रपद्यते)। स महात्मा सुदुर्लभः।। १९ ।।

At the end of many births, the one who has knowledge reaches Me by knowing, '*Vāsudeva* is everything.' That wise man is very rare. 19

**बहूनां** **जन्मनाम्** ज्ञानार्थसंस्काराश्रयाणाम् **अन्ते** समाप्तौ **ज्ञानवान्** प्राप्तपरिपाकज्ञानः **मां** वासुदेवं प्रत्यगात्मानं प्रत्यक्षतः **प्रपद्यते** । कथम्। **वासुदेवः** **सर्वमिति** । यः एवं सर्वात्मानं मां नारायणं प्रतिपद्यते **स** **महात्मा** न तत्समः अन्यः अस्ति अधिकः वा। अतः **सुदुर्लभः** मनुष्याणां सहस्रेषुइत्युक्तम्।। १९ ।।

[13]आत्मा एव सर्वं वासुदेवः इत्येवम् अप्रतिपत्तौ   कारणमुच्यते -

**कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः।**

**तं तं नियममास्थाय प्रकृत्या नियताः स्वया।। २० ।।**

स्वया प्रकृत्या नियताः तैः तैः कामैः हृतज्ञानाः तं तं नियमम् आस्थाय अन्यदेवताः प्रपद्यन्ते। ।। २०।।

Those whose discrimination is robbed away by their own particular desires, driven by their own dispositions, worship other gods following what is stipulated. 20

**कामैस्तैस्तैः** पुत्रपशुस्वर्गादिविषयैः **हृतज्ञाना**: अपहृतविवेकविज्ञानाः **प्रपद्यन्ते** **अन्यदेवता**: प्राप्नुवन्ति, वासुदेवाद् आत्मनः अन्या देवताः।

**तं तं नियमं** देवताराधने प्रसिद्धः यो यो नियमः तं तम् **आस्थाय** आश्रित्य **प्रकृत्या** स्वभावेन जन्मान्तरार्जितसंस्कारविशेषेण **नियता**: नियमिताः **स्वया** आत्मीयया।। २० ।।

---

[13] समानम् अधिकरणं ययोः तयोः भावः सामानाधिकरण्यम्।

तेषां च कामिनाम्   -

**यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति।**

**तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्।। २१ ।।**

यो यो भक्तः यां यां तनुं श्रद्धया अर्चितुम् इच्छति तस्य तस्य ताम् एव श्रद्धां अचलां अहम् विदधामि ।। २१ ।।

Whoever be the devotee and in whichever form (of a *devatā*) he wishes to worship with faith, indeed that same faith, I make firm for him.   21

**यो** **यः** कामी **यां** **यां** देवता **तनुं** **श्रद्धया** संयुक्तः **भक्तः** च सन् **अर्चितुम्** पूजयितुम् **इच्छति** **तस्य** **तस्य**

कामिनः **अचलां** स्थिरां **श्रद्धां** **तामेव** **विदधामि** स्थिरीकरोमि यया एव पूर्वं प्रवृत्तः स्वभावतः यो यां

देवतातनुं श्रद्धया अर्चितुमिच्छति इति।। २१ ।।

**[14]स तया श्रद्धया युक्तस्तस्या राधनमीहते।**

**लभते च ततः कामान् मयैव विहितान् हि तान्।। २२ ।।**

१. मया एव विहितान् हि तान् कामान् लभते।

२. मया एव विहितान् हितान् कामान् लभते।

सःतया श्रद्धयायुक्तः तस्य आराधनम्ईहतेच ततःमया एवविहितान्हि तान् कामान्लभते मया एवविहितान्हितान् कामान्लभते स तया श्रद्धया युक्तः (सन्) तस्याः राधनम् ईहते। मया एव विहितान् तान् कामान् हि ततः लभते च ।। २२ ।।

1. He who, endowed with that faith, engages in worship of that (*devatā*), gains from that (*devatā* he has worshipped) those objects of desire that are definitely ordained by me alone.

2. He who, endowed with that faith, engages in worship of that (*devatā*), gains from that (*devatā* he has worshipped) the very desirable objects of desire that are ordained by Me. 22

**स** **तया** मद्विहितया **श्रद्धया** **युक्तः** **तस्याः** देवतातन्वाः **राधनम्** आराधानम् **ईहते** चेष्टते ।

---

[14] *Gītā 4-39*

**लभते च ततः** तस्याः आराधितायाः देवतातन्वाः **कामान्** ईप्सितान् **मया एव** परमेश्वरेण सर्वज्ञेन

कर्मफलविभागज्ञतया **विहितान्** निर्मितान् **तान् हि** यस्मात् ते भगवता विहिताः कामाः तस्मात् तान्

अवश्यं लभते इत्यर्थः।

हितान् इति पदच्छेदे हितत्वं कामानामुपचरितं कल्प्यं न हि कामाः हिताः कस्यचित् ।। २२ ।।

यस्माद् अन्तवत्साधनव्यापारा: अविवेकिन: कामिनश्च ते अत: -

**अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम्।**

**देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि।। २३ ।।**

अल्पमेधसां तेषां फलम् अन्तवत् तु तद् भवति । देवयजो देवान् यान्ति मद्भक्ता: अपि मां यान्ति । २३ ।।

But for those who have limited discrimination, that result is finite. Those who worship the gods go to the gods; those who worship Me go to Me indeed. 23

**अन्तवद्** विनाशी **तु** **फलं** **तेषां** **तद्भवति** **अल्पमेधसाम्** अल्पप्रज्ञानां **देवान्** **देवयजो यान्ति** देवान्

यजन्ति इति देवयज: ते देवान् यान्ति।

**मद्भक्ता: यान्ति मामपि** एवं समाने अप्यायासे मामेव न प्रपद्यन्ते अनन्तफलाय अहो खलु कष्टं वर्त्तते

इत्यनुक्रोशं दर्शयति भगवान्।। २३ ।।

किंनिमित्तं मामेव न प्रपद्यन्ते इत्युच्यते -

**अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः।**

**परं भावमजानन्तो ममाव्ययमनुत्तमम्।। २४ ।।**

अबुद्धयः मम अव्ययम् अनुत्तमं परं भावम् अजानन्तः (सन्तः) माम् अव्यक्तं व्यक्तिमापन्नं मन्यन्ते ।। २४ ।।

Those who lack discrimination, not knowing My limitless, changeless nature beyond which there is nothing greater, look upon Me who is formless as one endowed with a manifest form. 24

**अव्यक्तम्** अप्रकाशं **व्यक्तिमापन्नं** प्रकाशं गतम् इदानीं **मन्यन्ते** **मां** नित्यप्रसिद्धम् ईश्वरमपि सन्तम्

**अबुद्धयः** अविवेकिनः **परं** **भावं** परमात्मस्वरूपं **अजानन्तो**ऽविवेकिनः **मम** **अव्ययं** व्ययरहितम्

**अनुत्तमं** निरतिशयं मदीयं भावम् अजानन्तः मन्यन्ते इत्यर्थः।। २४।)

तदीयमज्ञानं किंनिमित्तमित्युच्यते -

**नाहं प्रकाशः सर्वस्य योगमायासमावृतः।**

**मूढोऽयं नाभिजानाति लोको मामजमव्ययम्।। २५ ।।**

योगमायासमावृतः अहं सर्वस्य प्रकाशः न (भवामि)। (अत एव) अयं मूढः लोकः अजमव्ययं मां न अभिजानाति।। २५ ।।

1. I am not recognised by everyone. A person, completely covered by *yoga-māyā* (*māyā* united with the three *guṇas*) is deluded and does not know Me properly as the one who is unborn and changeless.

2. Alternate Reading: I, completely covered by *māyā,* united with the three *guṇas*, am not recognised by everyone. A person is deluded and does not know Me properly as the one who is unborn and changeless. 25

**नाहं प्रकाशः सर्वस्य** लोकस्य केषांचित् एव मद्भक्तानां प्रकाशः अहमित्यभिप्रायः।

**योगमायासमावृत**ः योगः गुणानां युक्तिः घटनम्। सैव माया योगमाया । तया योगमायया समावृतः

संछन्नः इत्यर्थः। अत एव **मूढः लोकः अयं नाभिजानाति** मामजमव्ययम्।। २५ ।।

यया योगमायया समावृतं मां लोको नाभिजानाति नासौ योगमाया मदीया सती मम ईश्वरस्य मायाविनः

ज्ञानं प्रतिबध्नाति यथा अन्यस्यापि मायाविनः माया ज्ञानं तद्वद्। यतः एवम् अतः -

**वेदाहं समतीतानि वर्तमानानि चार्जुन।**

**भविष्याणि च भूतानि मां तु वेद न कश्चन ।। २६ ।।**

अर्जुन अहं समतीतानि भूतानि वेद। वर्तमानानि (भूतानि) च (वेद)। भविष्याणि (भूतानि) च (वेद)। मां तु कश्चन न वेद ।। २६ ।।

I know all things that have gone before, that exist now and will exist in the future, *Arjuna*. But no one at all knows Me. 26

**अहं तु वेद जाने समतीतानि** समतिक्रान्तानि **भूतानि वर्तमानानि चार्जुन**।

**भविष्याणि च** भूतानि वेदाहम्। **मां तु वेद न कश्चन** मद्भक्तं मच्छरणमेकं मुक्त्वा

मत्तत्ववेदनाभावादेव न मां भजते।। २६ ।।

केन पुनः मत्तत्ववेदनप्रतिबन्धेन प्रतिबद्धानि सन्ति१.३ जायमानानि सर्वभूतानि मां न विदन्ति

इत्यपेक्षायाम् इदमाह -

**इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत।**

**सर्वभूतानि सम्मोहं सर्गे यान्ति परन्तप।। २७ ।।**

भारत परन्तप इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन सर्वभूतानि सर्गे सम्मोहं यान्ति ।। २७ ।।

O *Bhārata*, O the Scorcher of the enemies, all beings, due to delusion of the opposites arising from desire and aversion, go into a state of total delusion in this creation. 27

**इच्छाद्वेषसमुत्थेन** इच्छा च द्वेषश्च इच्छाद्वेषौ ताभ्यां समुत्तिष्ठति इति इच्छाद्वेषसमुत्थः तेन

इच्छाद्वेषसमुत्थेन।

केन इति विशेष-अपेक्षायाम् इदमाह - **द्वन्द्वमोहेन**। द्वन्द्वनिमित्तः मोहः द्वन्द्वमोहः ।

तौ एव इच्छाद्वेषौ  शीतोष्णवत् परस्परविरुद्धौ सुखदुःखतद्धेतुविषयौ यथाकालं सर्वभूतैः संबध्यमानौ

द्वन्द्वशब्देन अभिधीयेते।

तत्र यदेच्छाद्वेषौ सुखदुःखतद्धेतुसंप्राप्त्या लब्धात्मकौ भवतः तदा तौ सर्वभूतानां प्रज्ञायाः

स्ववशापादनद्वारेण परमार्थात्मतत्वविषयज्ञानोत्पत्तिप्रतिबन्धकारणं मोहं जनयतः।

न हि इच्छाद्वेषदोषवशीकृतचित्तस्य यथाभूतार्थविषयज्ञानमुत्पद्यते बहिरपि, किमु वक्तव्यं

ताभ्यामाविष्टबुद्धेः संमूढस्य प्रत्यगात्मनि बहुप्रतिबन्धे ज्ञानं नोत्पद्यत इति।

अतस्तेन इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत भरतान्वयज सर्वभूतानि सम्मोहितानि सन्ति संमोहं संमूढतां

सर्गे जन्मनि उत्पत्तिकाले इत्येतत्।

यान्ति गच्छन्ति हे परन्तप मोहवशान्येव सर्वभूतानि जायमानानि जायन्त इत्यभिप्रायः।

यत एवमतस्तेन द्वन्द्वमोहेन प्रतिबद्धप्रज्ञानानि सर्वभूतानि संमोहितानि मामात्मभूतं न जानन्ति अत एव

आत्मभावेन मां न भजन्ते।। २७ ।।

के पुनः अनेन द्वन्द्वमोहेन निर्मुक्ताः सन्तः त्वां विदित्वा यथाशास्त्रम् आत्मभावेन भजन्ते इत्यपेक्षितमर्थं

दर्शयितुम् उच्यते -

**येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम्।**

**ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः।। २८ ।।**

पुण्यकर्मणां येषां जनानां तु पापम् अन्तगतं ते द्वन्द्वमोहनिर्मुक्ताः दृढव्रताः (सन्तः) मां भजन्ते ।। २८ ।।

But people of good actions, for whom *pāpa* has come to an end, being released from the delusion of the opposites, being firm in their commitment, they seek Me. 28

**येषां** **तु** पुनः **अन्तगतं** समाप्तप्रायं क्षीणं **पापं** **जनानां** **पुण्यकर्मणाम्** पुण्यं कर्म येषां सत्वशुद्धिकारणं

विद्यते ते पुण्यकर्माणः तेषां पुण्यकर्मणां **ते** **द्वन्द्वमोहनिर्मुक्ताः** यथोक्तेन द्वन्द्वमोहेन निर्मुक्ताः **भजन्ते** **मां**

परमात्मानं **दृढव्रताः** एवमेव परमार्थतत्वं न अन्यथा इत्येवं सर्वपरित्यागव्रतेन नि□तविज्ञानाः दृढव्रताः

उच्यन्ते।।। २८ ।।

ते किमर्थं भजन्ते इत्युच्यते -

**जरामरणमोक्षाय मामाश्रित्य यतन्ति ये।**

**ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम्।। २९ ।।**

जरामरणमोक्षाय माम् आश्रित्य ये यतन्ति ते तद् ब्रह्म विदुः। कृत्स्नम् अध्यात्मं अखिलम् कर्म च (ते विदुः)।। २९ ।।

Having taken refuge in Me, those who make effort for freedom from old age and death, they know that *Brahman* wholly as themselves and they also know *karma* in its entirety. 29

**जरामरणमोक्षाय** जरामरणमोक्षार्थं **मां** परमेश्वरम् **आश्रित्य** मत्समाहितचित्तः सन्तः **यतन्ति** प्रयतन्ते ।

**ये** **ते** यद् **ब्रह्म** परं **तद्विदुः** **कृत्स्नं** समस्तम् **अध्यात्मं** प्रत्यगात्मविषयं वस्तु तद्विदुः **कर्म** **चाखिलम्**

समस्तं विदुः।। २९ ।।

**साधिभूताधिदैवं मां साधियज्ञं च ये विदुः।**

**प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः।। ३० ।।**

ये (मद्भक्ताः) साधिभूताधिदैवं साधियज्ञं च मां विदुः ते युक्तचेतसः प्रयाणकाले अपि मां विदुः च ।। ३० ।।

Those who know Me as centred on the physical world, the *devatās* and the rituals, whose minds are absorbed in me, even at the end of their life, they know me. 30

**साधिभूताधिदैवं** अधिभूतं च अधिदैवं च अधिभूताधिदैवं सहाधिभूताधिदैवेन साधिभूताधिदैवं च **मां** **ये** **विदुः** **साधियज्ञं** च सहाधियज्ञेन साधियज्ञं ये विदुः।

**प्रयाणकालेऽपि** **च** मरणकाले अपि च **मां** **ते** **विदुः** **युक्तचेतसः** समाहितचित्ताः इति ।। ३०।।

ओं तत्सत्। इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
ज्ञानविज्ञानयोगो नाम सप्तमोऽध्यायः ।। ७।।

# अध्यायः ८

# अक्षरब्रह्मयोगः

ते ब्रह्म तद्विदुः कृत्स्नम् इत्यादिना भगवता अर्जुनस्य प्रश्नबीजानि उपदिष्टानि अतः तत् प्रश्नार्थम् -

**अर्जुन उवाच।**

**किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम।**

**अधिभूतं च किं प्रोक्तम् अधिदैवं किमुच्यते।। ८.१ ।।**

**अधियज्ञः कथं कोऽत्र देहेऽस्मिन् मधुसूदन।**

**प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः।। ८.२ ।।**

पुरुषोत्तम तद्ब्रह्म किं। अध्यात्मं किम्। कर्म किं। अधिभूतं किं प्रोक्तम्। (शास्त्रज्ञैः) अधिदैवं च किं उच्यते। मधुसूदन अस्मिन् देहे कः अधियज्ञः। कथं अत्र (अधियज्ञः तिष्ठति)। प्रयाणकाले च कथं नियतात्मभिः ज्ञेयोऽसि ।। २ ।।

*Arjuna* said:
What is that *Brahman*? What is centred on the self? What is *karma* O! *Puruṣottama*? What is spoken of as centred on the beings? And what is it that is said as centred on the gods? 1

O! *Madhusūdana*, how and who is that which is centred on ritual here in this body? And at the time of death, how are you known by those whose minds are steady? 2

एषां प्रश्नानां यथाक्रमं निर्णयाय -

**श्रीभगवानुवाच।**

**अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते।**

**भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः।। ८.३ ।।**

ब्रह्म परमम् अक्षरम्। अध्यात्मं स्वभावः उच्यते। भूतभावोद्भवकरः विसर्गः कर्मसंज्ञितः।। ३ ।।

*Śrī Bhagavān* said:
*Brahman* is limitless and not subject to change. Its manifestation, centred on the body is called *adhyātma*, the *jīva*. What is known as *karma* is an offering, which causes the production of bodies for the beings. 3

अक्षरमिति। अक्षरं न क्षरतीति अक्षरं पर आत्मा।

एतस्य वा अक्षरस्य प्रशासने गार्गि (बृ. ३.८.९) इति श्रुतेः।

ओङ्कारस्य च ओमित्येकाक्षरं ब्रह्म (गी ८.१३) इति परेण विशेषणादग्रहणम्।

परमम् इति च निरतिशये ब्रह्मण्यक्षरे उपपन्नतरं विशेषणम्।

तस्यैव परस्य ब्रह्मणः प्रति-देहं प्रत्यगात्म-भावः स्वभावः स्वो भावः, अध्यात्ममुच्यते।

आत्मानं देहमधिकृत्य प्रत्यगात्मतया प्रवृत्तं परमार्थ-ब्रह्मावसानं वस्तु स्वभावः अध्यात्ममुच्यते,

अध्यात्म-शब्देनाभिधीयते। भूतभावोद्भवकरः भूतानां भावो भूत-भावः, तस्योद्भवो भूत-भावोद्भवः, तं

करोतीति भूत-भावोद्भवकरः। भूत-वस्तूत्पत्ति-कर इत्यर्थः।

विसर्गः विसर्जनं देवतोद्देशेन चरु-पुरोडाशादेर्द्रव्यस्य परित्यागः।

स एषः विसर्ग-लक्षणो यज्ञः कर्मसंज्ञितः कर्म-शब्दित इत्येतत्।

एतस्माद्धि बीज-भूताद् वृष्ट्यादि-क्रमेण स्थावर-जङ्गमानि भूतान्युद्भवन्ति।। ३ ।।

अधिभूतमिति।

**अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम्।**

**अधियज्ञोऽहमेवात्र देहे देहभृतां वर।। ८.४ ।।**

अधिभूतं क्षरः भावः पुरुषश्चाधिदैवतम्। अधियज्ञोऽहमेवात्र देहे देहभृतां वर।। ४ ।।

O! The most exalted one among those who have a body, what is centred on the beings is the one subject to decline and what is centred on the *devatās* is *hiraṇyagarbha*; here in this body, I alone am what is centred on ritual. 4

अधिभूतमिति। अधिभूतं प्राणि-जातमधिकृत्य भवतीति। कोऽसौ क्षरः क्षरतीति क्षरो विनाशी भावः यत्किञ्चिद् जनिमद्वस्तु इत्यर्थः। पुरुषः पूर्णमनेन सर्वमिति, पुरि शयनाद्वा पुरुषः, आदित्यान्तर्गतो हिरण्यगर्भः सर्व-प्राणि-करणानामनुग्राहकः सः अधिदैवतम्। अधियज्ञः सर्व-यज्ञाभिमानिनी देवता विष्ण्वाख्या। यज्ञो वै विष्णुः (तै.सं. १.७.४) इति श्रुतेः। स हि विष्णुः अहमेवात्र अस्मिन् देहे यो यज्ञः तस्याहमधियज्ञः। यज्ञो हि देहनिर्वर्त्यत्वेन देहसमवायीति देहाधिकरणो भवति, देहभृतां वर।। ४ ।।

**अन्तकाले च मामेव स्मरन् मुक्त्वा कलेवरम्।**

**यः प्रयाति स म□ावं याति नास्त्यत्र संशयः।। ८.५ ।।**

अन्तकाले च   यः माम् एव स्मरन् कलेवरं मुक्त्वा प्रयाति स मद्भावं याति। अत्र संशयः नास्ति ।। ५ ।।

And, at the time of death, the one who departs giving up the body, remembering Me alone, he gains My nature. Regarding this, there is no doubt. 5

अन्तकाल इति। अन्तकाले च मरण-काले मामेव परमेश्वरं विष्णुं स्मरन् मुक्त्वा परित्यज्य कलेवरं

शरीरं यः प्रयाति गच्छति स म□ावं वैष्णवं तत्त्वं याति।

नास्ति न विद्यते अत्र अस्मिन्नर्थे संशयः याति वा न वेति।। ५ ।।

न मद्विषये एव अयं नियमः किं तर्हि -

**यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरं।**

**तं तमेवैति कौन्तेय सदा तद्भावभावितः।। ८.६ ।।**

कौन्तेय सदा तद्भावभावितः (सन्) अन्ते यं यं वापि भावं स्मरन् कलेवरं त्यजति तं तमेव एति ।। ६।।

O! Son of *Kuntī*, at the time of death, remembering whatever thing he gives up the body, being always in that state, that alone he reaches. 6

यमिति। यं यं वापि यं यं भावं देवता-विशेषं स्मरन् चिन्तयन् त्यजति परित्यजति अन्ते अन्त-काले

प्राण-वियोग-काले कलेवरं शरीरं तं तमेव स्मृतं भावमेव एति नान्यं कौन्तेय सदा सर्वदा तद्भावभावितः

तस्मिन् भावः तद्भावः, स भावितः स्मर्यमाणतया अभ्यस्तो येन स तद्भाव-भावितः सन्।। ६ ।।

यस्मादेवम् अन्त्या भावना देहान्तरप्राप्तौ कारणम् -

**तस्मात् सर्वेषु कालेषु मामनुस्मर युध्य च।**

**मय्यर्पितमनोबुद्धिः मामेवैष्यस्यसंशयः।। ८.७ ।।**

तस्मात् सर्वेषु कालेषु मामनुस्मर युध्य च। मय्यर्पितमनोबुद्धिः मामेव असंशयः एष्यसि ।। ७ ।।

Therefore, remember Me at all times and fight. Being one whose mind and intellect are offered unto Me, you will reach Me alone. There is no doubt. 7

तस्मादिति। तस्मात् सर्वेषु कालेषु मामनुस्मर, यथा-शास्त्रं युध्य च युद्धं च स्वधर्मं कुरु।

मयि वासुदेवेऽर्पिते मनोबुद्धी यस्य तव स त्वं मय्यर्पितमनोबुद्धिः सन् मामेव यथा-स्मृतम् एष्यसि

आगमिष्यसि असंशयः न संशयोऽत्र विद्यते।। ७ ।।

**अभ्यासयोगयुक्तेन चेतसा नान्यगामिना।**

**परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन्।। ८.८ ।।**

O! *Pārtha*, reflecting as he was taught, with a mind endowed with the practice of *yoga*, with a mind that does not stray to anything else, he reaches the limitless self-effulgent person. 8

अभ्यासेति। अभ्यासयोगयुक्तेन मयि चित्त-समर्पण-विषय-भूते एकस्मिन् तुल्य-प्रत्ययावृत्ति-लक्षणो विलक्षण-प्रत्ययानन्तरितोऽभ्यासः, स चाभ्यासो योगः, तेन युक्तं तत्रैव व्यावृत्तं योगिनश्चेतः तेन चेतसा नान्यगामिना नान्यत्र विषयान्तरे गन्तुं शीलमस्येति नान्य-गामी, तेन नान्य-गामिना परमं निरतिशयं पुरुषं दिव्यं दिवि सूर्य-मण्डले भवं याति गच्छति हे पार्थ अनुचिन्तयन् शास्त्राचार्योपदेशमनु ध्यायन्नित्येतत्।।

८ ।।

किंविशिष्टं च पुरुषं यातीत्युच्यते -

**कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः।**

**सर्वस्य धातारमचिन्त्यरूपमादित्यवर्णं तमसः परस्तात्।। ८.९ ।।**

The one who contemplates upon the one who is omniscient, the most ancient, who rules, subtler than the subtlest, ordainer of all, whose form cannot be conceived of, who is effulgent like the sun, who is beyond ignorance (and knowledge), (he goes to the limitless self-effulgent person.) 9

कविमिति। कविं क्रान्त-दर्शिनं सर्वज्ञं पुराणं चिरन्तनम् अनुशासितारं सर्वस्य जगतः प्रशासितारम् अणोः सूक्ष्मादपि अणीयांसं सूक्ष्मतरम् अनुस्मरेद् अनुचिन्तयेद् यः कश्चित्। सर्वस्य कर्म-फल-जातस्य धातारं विधातारं विचित्रतया प्राणिभ्यो विभक्तारं विभज्य दातारम् अचिन्त्यरूपं नास्य रूपं नियतं विद्यमानमपि केनचिच्चिन्तयितुं शक्यत इत्यचिन्तय-रूपः तम् आदित्यवर्णम् आदित्यस्येव नित्य-चैतन्य-प्रकाशो वर्णो यस्य तमादित्यवर्णं तमसः परस्ताद् अज्ञान-लक्षणाद् मोहान्धकारात् परम्। तमनुचिन्तयन् यातीति पूर्वेण एव सम्बन्धः।। ९ ।।

किंच

**प्रयाणकाले मनसाऽचलेन भक्त्या युक्तो योगबलेन चैव।**

**भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् स तं परं पुरुषमुपैति दिव्यम्।। ८.१० ।।**

At the time of death, with a steady mind, endowed with devotion and the strength gathered by *yoga*, indeed, placing the breath properly between the brows, he reaches that limitless effulgent person. 10

प्रयाणेति। प्रयाणकाले मरण-काले मनसाऽचलेन चलन-वर्जितेन भक्त्या युक्तो भजनं भक्तिः तया युक्तो योगबलेन चैव योगस्य बलं योग-बलं तेन समाधिज-संस्कार-प्रचय-जनित-चित्त-स्थैर्य-लक्षणं योग-बलं तेन च युक्त इत्यर्थः। पूर्वं हृदय-पुण्डरीके वशीकृत्य चित्तं, तत ऊर्ध्व-गामिन्या नाड्या भूमि-जय-क्रमेण भ्रुवोर्मध्ये प्राणमावेश्य स्थापयित्वा सम्यग् अप्रमत्तः सन् स एवं विद्वान् योगी कविं पुराणम् (गी ८.९) इत्यादि-लक्षणं तं परं पुरुषम् उपैति प्रतिपद्यते दिव्यं द्योतनात्मकम्।। १० ।।

पुनरपि वक्ष्यमाणेनोपायेन प्रतिपिपत्सितस्य ब्रह्मणो वेदविद्वदनादि-विशेषण-विशेष्यस्याभिधानं करोति

भगवान् -

**यदक्षरं वेदविदो वदन्ति विशन्ति यद्यतयो वीतरागाः।**

**यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण प्रवक्ष्ये।। ८.११ ।।**

I will tell you briefly about that end, which does not decline, about which knowers of Veda talk about which the renunciates free from desire enter, desiring, which they follow a life of study and discipline. 11

यदिति। यदक्षरं न क्षरतीत्यक्षरमविनाशि वेदविदो वेदार्थज्ञाः वदन्ति तद्वा एतदक्षरं गार्गि ब्राह्मणा

अभिवदन्ति (बृ. ३.८.८) इति श्रुतेः।

सर्व-विशेष-निवर्तकत्वेनाभिवदन्ति अस्थूलमनणु (बृ. ३.८.८) इत्यादि।

किञ्च विशन्ति प्रविशन्ति सम्यग्दर्शन-प्राप्तौ सत्यां यद् यतयो यतन-शीलाः संन्यासिनः वीतरागाः वीतो

विगतो रागो येभ्यः ते वीत-रागाः।

यत् चाक्षरम् इच्छन्तः - ज्ञातुमिति वाक्य-शेषः - ब्रह्मचर्यं गुरौ चरन्ति आचरन्ति।

तत् ते पदं तद् अक्षराख्यं पदं पदनीयं ते तुभ्यम् संग्रहेण संग्रहः संक्षेपः तेन संक्षेपेण प्रवक्ष्ये

कथयिष्यामि।। ११ ।।

स यो ह वै तद् भगवन् मनुष्येषु प्रायणान्तम् ओङ्कारमभिध्यायीत कतमं वाव स तेन लोकं जयतीति।

तस्मै स होवाच एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कारः (प्र. ५.१, ५.२) इत्युपक्रम्य यः पुनरेतं त्रिमात्रेण ओमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत स सामभिरुन्नीयते सोमलोकम् (प्र. ५.४) इत्यादिना वचनेन, अन्यत्र धर्मादन्यत्राधर्मात्(कठ. १.२.१४) इति चोपक्रम्य सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण ब्रवीमि ओमित्येतत् (कठ. १.२.१५) इत्यादिभिश्च वचनैः, परस्य ब्रह्मणो वाचक-रूपेण, प्रतिमावत् प्रतीक-रूपेण वा पर-ब्रह्म-प्रतिपत्ति-साधनत्वेन मन्द-मध्यम-बुद्धीनां विवक्षितस्य ओङ्कारस्य उपासनं कालान्तरे मुक्ति-फलमुक्तं यत् तदेव

इहापि कविं पुराणमनुशासितारम् (गी ८.९) यदक्षरं वेदविदो वदन्ति (गी ८.११) इति चोपन्यस्तस्य परस्य ब्रह्मणः पूर्वोक्त-रूपेण प्रतिपत्त्युपाय-भूतस्य ओङ्कारस्य कालान्तर-मुक्तिफलमुपासनं, योग-धारणा-सहितं वक्तव्यं प्रसक्तानुप्रसक्तं च यत्किञ्चिद् इत्येवमर्थ उत्तरो ग्रन्थ आरभ्यते ऽ

**सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च।**

**मूध्न्यार्धायात्मनः प्राणमास्थितो योगधारणाम्।।१२।।**

सर्वेति। सर्वद्वारेण सर्वाणि च तानि द्वाराणि च सर्वद्वाराण्युपलब्धौ। तानि सर्वाणि संयम्य संयमनं कृत्वा, मनो हृदि हृदय-पुण्डरीके निरुध्य निरोधं कृत्वा निष्प्रचारमापाद्य, तत्र वशीकृतेन मनसा हृदयाद् ऊर्ध्व-गामिन्या नाड्योर्ध्वमारुह्य, मूर्ध्नि आधायात्मनः प्राणम् आस्थितः प्रवृत्तो योगधारणां धारयितुम्।। १२ ।।

तत्र एव च धारयन् -

**ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन्।**

**यः प्रयाति त्यजन्देहं स याति परमां गतिम्।। ८.१३ ।।**

Closing all the sense organs and withdrawing the mind into the heart, placing his breath at the top of his head and remaining, holding (his breath) by *yoga*, chanting the single syllable *Om*, which is *Brahman*, giving up the body, the one who departs remembering Me, goes to the most exalted end. 12, 13

ओमिति। ओमित्येकाक्षरं ब्रह्म ब्रह्मणोऽभिधानभूतम् ओङ्कारं व्याहरन् उच्चारयन् तदर्थभूतं माम् ईश्वरम्

अनुस्मरन् अनुचिन्तयन् यः प्रयाति म्रियते सः त्यजन् परित्यजन् देहं शरीरम्।

त्यजन् देहम् इति प्रयाण-विशेषणार्थं, देह-त्यागेन प्रयाणम् आत्मनो, न स्वरूप-नाशेनेत्यर्थः।

स एवं त्यजन् याति गच्छति परमां प्रकृष्टां गतिम्।। १३ ।।

किं च -

**अनन्यचेताः सततं यो मां स्मरति नित्यशः ।**

**तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः।। ८.१४ ।।**

O! *Pārtha*, the one who has a mind that sees no other, who remembers Me constantly for a length of time, for that *yogī* who is always united with Me, I am easily gained. 14

अनन्यचेता इति। अनन्यचेताः नान्य-विषये चेतो यस्य सोऽयम् अनन्य-चेता योगी सततं सर्वदा यो मां

परमेश्वरं स्मरति नित्यशः। सततमिति नैरन्तर्यमुच्यते। नित्यश इति दीर्घ-कालत्वमुच्यते।

न षण्मासं संवत्सरं वा, किं तर्हि यावज्जीवं नैरन्तर्येण यो मां स्मरति इत्यर्थः।

तस्य योगिनः अहं सुलभः सुखेन लभ्यो हे पार्थ नित्ययुक्तस्य सदा समाहित-चित्तस्य योगिनः।

यत एवमतोऽनन्य-चेताः सन् मयि सदा समाहितो भवेत्।। १४ ।।

तव सौलभ्येन किं स्यात्, इति उच्यते। श्रृणु तन्मम सौलभ्येन यद्भवति -

**मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम्।**

**नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः।। ८.१५ ।।**

Having reached Me, the wise men do not gain another birth, which is the abode of misery and is finite; they have reached the ultimate success. 15

मामिति। मामुपेत्य मामीश्वरमुपेत्य मद्भावमापद्य पुनर्जन्म पुनरुत्पत्तिं न प्राप्नुवन्ति।

किं-विशिष्टं पुनर्जन्म न प्राप्नुवन्ति तद्विशेषणमाह - दुःखालयं दुःखानाम् आध्यात्मिकादीनाम्

आलयमाश्रयम् आलीयन्ते यस्मिन् दुःखानीति दुःखालयं जन्म।

न केवलं दुःखालयम् अशाश्वतम् अनवस्थित-स्वरूपं च नाप्नुवन्ति ईदृशं पुनर्जन्म महात्मानः यतयः

संसिद्धिं मोक्षाख्यां परमां प्रकृष्टां गताः प्राप्ताः। ये पुनर्मां न प्राप्नुवन्ति ते पुनरावर्त्तन्ते।। १५ ।।

किं पुनः त्वत्तोऽन्यत् प्राप्ताः पुनरावर्त्तन्त इत्युच्यते -

**आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनोऽर्जुन।**

**मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते।। ८.१६ ।।**

O! *Arjuna*, all the worlds (where beings exist) up to the world of Brahmaji, are of the nature of those from, which one will return. However, having reached Me, O! Son of *Kuntī*, there is no rebirth. 16

आब्रह्मेति। आब्रह्मभुवनाद् भवन्त्यस्मिन् भूतानीति भुवनं ब्रह्म-भुवनं, ब्रह्म-लोक इत्यर्थः।

आ-ब्रह्म-भुवनात्, सह ब्रह्म-भुवनेन लोकाः सर्वे पुनरावर्त्तिनः पुनरावर्त्तन-स्वभावा हे अर्जुन।

माम् एकम् उपेत्य तु कौन्तेय पुनर्जन्म पुनरुत्पत्तिः न विद्यते।। १६ ।।

ब्रह्म-लोक-सहिता लोकाः कस्मात् पुनरावर्त्तिनः काल-परिच्छिन्नत्वात्। कथम् -

**सहस्त्रयुगपर्यन्तमहर्यद्ब्रह्मणो विदुः।**

**रात्रिं युगसहस्त्रान्तां तेऽहोरात्रविदो जनाः।। ८.१७ ।।**

Those people who know about the day and night, know that a day of Brahmaji has a measure of one thousand *yugas* and a night (of Brahmaji), a measure of one thousand *yugas 17*

सहस्त्रेति। सहस्त्रयुगपर्यन्तं सहस्त्रं युगानि पर्यन्तः पर्यवसानं यस्याह्नः तद् अहः सहस्त्र-युग-पर्यन्तं ब्रह्मणः

प्रजापतेर्विराजो विदुः। रात्रिम् अपि युगसहस्त्रान्ताम् अहः-परिमाणम् एव।

के विदुरित्याह - तेऽहोरात्रविदः काल-संख्या-विदः जनाः इत्यर्थः।

यत एवं काल-परिच्छिन्नाः तेऽतः पुनरावर्त्तिनो लोकाः।। १७ ।।

प्रजापतेरहनि यद्भवति, रात्रौ च, तदुच्यते -

**अव्यक्ताद् व्यक्तयः सर्वाः प्रभवन्त्यहरागमे।**

**रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके।। ८.१८ ।।**

At the beginning of the day, all things that are manifest arise from the unmanifest. At the beginning of the night they resolve in that which is called unmanifest. 18

अव्यक्तादिति। अव्यक्ताद् अव्यक्तं प्रजापतेः स्वापावस्था, तस्मादव्यक्ताद् व्यक्तयः व्यज्यन्त इति व्यक्तयः

स्थावर-जङ्गम-लक्षणाः सर्वाः प्रजाः प्रभवन्ति अभिव्यज्यन्ते।

अह्न आगमोऽहरागमस्तस्मिन् अहरागमे काले ब्रह्मणः प्रबोध-काले।

तथा रात्र्यागमे ब्रह्मणः स्वाप-काले प्रलीयन्ते सर्वाः व्यक्तयः तत्रैव पूर्वोक्ते अव्यक्तसंज्ञके।। १८ ।।

अकृताभ्यागम-कृत-विप्रणाश-दोष-परिहारार्थं बन्ध-मोक्ष-शास्त्र-प्रवृत्ति-साफल्य-प्रदर्शनार्थम्,

अविद्यादि-क्लेश-मूल-कर्माशयवशाच्चावशो भूत-ग्रामो भूत्वा भूत्वा प्रलीयते इत्यतः संसारे वैराग्य-

प्रदर्शनार्थं च, इदमाह -

**भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते।**

**रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे।। ८.१९ ।।**

Without any personal volition, by the law of *karma*, a person comes into being again and again. Every time the day breaks for Brahmaji, all the beings emerge. Then again, having existed, they resolve. 19

भूतग्राम इति। भूतग्रामः भूत-समुदायः स्थावर-जङ्गम-लक्षणो यः पूर्वस्मिन् कल्प आसीत् सः एवायं

नान्यः भूत्वा भूत्वा अहरागमे, प्रलीयते पुनः पुनः रात्र्यागमे अह्नः क्षये, अवशः अस्वतन्त्र एव हे पार्थ

प्रभवति जायते अवश एव अहरागमे।। १९ ।।

यदुपन्यस्तमक्षरं तस्य प्राप्त्युपायो निर्दिष्ट ओमित्येकाक्षरं ब्रह्म (गी ८.१३) इत्यादिना।

अथेदानीम् अक्षरस्यैव स्वरूप-निर्दिदिक्षयेदम् उच्यतेऽनेन योग-मार्गेण इदं गन्तव्यमिति -

**परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात् सनातनः।**

**यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति।। ८.२० ।।**

परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात् सनातनः। यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति।। २०।।

But distinct from that unmanifest is another unmanifest, which is existent and eternal. That is not destroyed when all beings are destroyed. 20

पर इति। परः व्यतिरिक्तो भिन्नः। कुतः तस्मात् पूर्वोक्तात्।

तु-शब्दोऽक्षरस्य विवक्षितस्याव्यक्ताद् वैलक्षण्य-प्रदर्शनार्थः।

भावः अक्षराख्यं परं ब्रह्म। व्यतिरिक्तत्वे सत्यपि सालक्षण्य-प्रसङ्गोऽस्तीति तद्विनिवृत्त्यर्थमाह अन्य इति।

अन्यः विलक्षणः। स च अव्यक्तः अनिन्द्रियगोचरः। परः तस्माद् इत्युक्तम्।

कस्मात् पुनः परः पूर्वोक्ताद् भूत-ग्राम-बीज-भूताद् अविद्या-लक्षणाद् अव्यक्तात् अन्यो विलक्षणो भाव

इत्यभिप्रायः।

सनातनः चिरन्तनः।

यः सः भावः सर्वेषु भूतेषु ब्रह्मादिषु नश्यत्सु न विनश्यति।। २०।।

**अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम्।**

**यं प्राप्य न निवर्त्तन्ते तद्धाम परमं मम।। ८.२१।।**

The unmanifest that was spoken of as the one that is not subject to destruction, that, they say is the highest end. That abode of mine, gaining, which, (people) do not return, is the highest. 21

अव्यक्त इति। योऽसौ अव्यक्तः अक्षर इत्युक्तः तम् एव अक्षर-संज्ञकम् अव्यक्तं भावम् आहुः परमां

प्रकृष्टां गतिम्।

यं भावं प्राप्य गत्वा न निवर्त्तन्ते संसाराय तद्धाम स्थानं परमं प्रकृष्टं मम विष्णोः परमं पदमित्यर्थः।।

२१ ।।

तल्लब्धेः उपाय उच्यते -

**पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया।**

**यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम्।। ८.२२ ।।**

That *puruṣa* is the limitless, O! *Pārtha*, but can be gained by a devotion in, which there is no other. (He is) the one in whom all the beings have their being, the one by whom all this is pervaded. 22

पुरुष इति। पुरुषः पुरि-शयनात् पूर्णत्वाद् वा स परः पार्थ परो निरतिशयो यस्मात् पुरुषान्न परं किञ्चित्।

स भक्त्या लभ्यस्तु ज्ञान-लक्षणया अनन्यया आत्म-विषयया।

यस्य पुरुषस्य अन्तःस्थानि मध्यस्थानि भूतानि कार्य-भूतानि। कार्यं हि कारणस्यान्तर्वर्त्ति भवति।

येन पुरुषेण सर्वमिदं जगत् ततं व्याप्तमाकाशेनेव घटादि।। २२ ।।

प्रकृतानां योगिनां प्रणवावेशित-ब्रह्म-बुद्धीनां कालान्तर-मुक्ति-भाजां ब्रह्म-प्रतिपत्तय उत्तरो मार्गो वक्तव्य

इति यत्र काले इत्यादि विवक्षितार्थ-समर्पणार्थमुच्यते। आवृत्ति-मार्गोपन्यास इतर-मार्ग-स्तुत्यर्थः -

**यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः।**

**प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ।। ८.२३ ।।**

O! Foremost of the *Bharata* family, I will tell you what is the time (route) of no return and also the time (route) of return by, which the departed *yogīs* go. 23

यत्रेति। यत्र काले प्रयाता इति व्यवहितेन सम्बन्धः। यत्र यस्मिन् काले तु अनावृत्तिम् अपुनर्जन्म

आवृत्तिं तद्विपरीतां चैव योगिनः इति योगिनः कर्मिणश्चोच्यन्ते।

कर्मिणः तु गुणतः, कर्मयोगेन योगिनाम् (गी ३.३) इति विशेषणाद्, योगिनः। यत्र काले प्रयाता मृता

योगिनोऽनावृत्तिं यान्ति, यत्र काले च प्रयाता आवृत्तिं यान्ति, तं कालं वक्ष्यामि भरतर्षभ।। २३ ।।

**अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्।**

**तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः।। ८.२४ ।।**

Where, in, which path, the god of fire or time, the god of light or time, the god of the day, the god of the fortnight of the waxing moon, the god of the six months of the sun's travel towards the north are present, departing there, through that path, meditators of *Brahman* go to *brahma-loka*. 24

अग्निरिति। अग्निः कालाभिमानिनी देवता।

तथा ज्योतिः अपि देवतैव कालाभिमानिनी।

अथवा अग्निज्योतिषी यथाश्रुते एव देवते।

भूयसा तु निर्देशो यत्र काले तं कालम्इति आम्र-वणवत्।

तथा अहः देवता अहरभिमानिनी शुक्लः शुक्ल-पक्ष-देवता।

षण्मासा उत्तरायणं तत्रापि देवतैव मार्गभूतेति स्थितोऽन्यत्रायं न्यायः।

तत्र तस्मिन् मार्गे प्रयाता मृता गच्छन्ति ब्रह्म ब्रह्मविदो ब्रह्मोपासका ब्रह्मोपासन-परा जनाः।

क्रमेणेति वाक्य-शेषः।

न हि सद्यो-मुक्ति-भाजां सम्यग्दर्शन-निष्ठानां गतिरागतिर्वा क्वचिदस्ति।

न तस्य प्राणा उत्क्रामन्ति (बृ. ४.४.६) इति श्रुतेः।

ब्रह्म-लीन-प्राणा एव ते ब्रह्म-मया ब्रह्म-भूता एव ते।। २४ ।।

**धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्।**

**तत्र चान्द्रमसं ज्योतिः योगी प्राप्य निवर्त्तते।। ८.२५ ।।**

The *yogī*, (travelling by the route) where the presiding deity of smoke, similarly the god of night, the god of the dark fortnight, and the god of the six months when the sun is travelling south (are present), having gained the world of the moon, returns. 25

धूम इति। धूमो रात्रिः धूमाभिमानिनी रात्र्यभिमानिनी च देवता।

तथा कृष्णः कृष्ण-पक्ष-देवता।

षण्मासा दक्षिणायनम् इति च पूर्ववद् देवतैव।

तत्र चन्द्रमसि भवं चान्द्रमसं ज्योतिः फलमिष्टादि-कारी योगी कर्मी प्राप्य भुक्त्वा तत्क्षयादिह पुनः

निवर्त्तते।। २५ ।।

**शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते।**

**एकया यात्यनावृत्तिमन्ययावर्त्तते पुनः।। ८.२६ ।।**

As is well known, these two paths of the world, the bright and the dark, are considered eternal. By the one (path), one goes to a place of no return, by the other, one returns again. 26

शुक्लेति। शुक्लकृष्णे शुक्ला च कृष्णा च शुक्ल-कृष्णे ज्ञान-प्रकाशकत्वात् शुक्ला तदभावात् कृष्णा।

एते शुक्ल-कृष्णे हि गती जगतः इत्यधिकृतानां ज्ञान-कर्मणोर्न जगतः सर्वस्यैवैते गती सम्भवतः।

शाश्वते नित्ये संसारस्य नित्यत्वाद् मते अभिप्रेते। तत्र एकया शुक्लया याति अनावृत्तिम्।

अन्यया इतरया आवर्त्तते पुनः भूयः।। २६ ।।

**नैते सृती पार्थ जानन् योगी मुह्यति कश्चन।**

**तस्मात् सर्वेषु कालेषु योगयुक्तो भवार्जुन।। ८.२७ ।।**

Knowing these two paths, O! *Pāṛthā*, a *yogī* is not deluded. Therefore, at all times may you be united to *yoga*, *Arjuna*. 27

नैते इति। नैते यथोक्ते सृती मार्गौ पार्थ जानन् संसारायैका, अन्या मोक्षाय चेति योगी न मुह्यति कश्चन

कश्चिदपि।

तस्मात् सर्वेषु कालेषु योगयुक्तः समाहितो भवार्जुन।। २७ ।।

श्रृणु योगस्य माहात्म्यम् -

**वेदेषु यज्ञेषु तपःसु चैव दानेषु यत्पुण्यफलं प्रदिष्टम्।**

**अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यम्।। ८.२८ ।।**

The *yogī* knowing this, (the answers to *Arjuna's* questions in 8.1 & 8.2) goes beyond all things taught by the *śāstra*, with reference to the result of good actions, which abides in the (study of the) Veda, the rituals, disciplines, and charities. And he reaches the primal cause (of creation), which is the highest state. 28

वेदेष्विति। वेदेषु सम्यगधीतेषु यज्ञेषु च साद्गुण्येनानुष्ठितेषु तपःसु च सुतप्तेषु दानेषु च सम्यग् दत्तेषु एतेषु यत् पुण्यफलं पुण्यस्य फलं पुण्य-फलं प्रदिष्टम् शास्त्रेण अत्येति अतीत्य गच्छति तत्सर्वं फल-जातम् इदं विदित्वा सप्त-प्रश्न-निर्णय-द्वारेणोक्तं सम्यग् अवधार्यानुष्ठाय योगी परं प्रकृष्टमैश्वरं स्थानमुपैति प्रतिपद्यते आद्यम् आदौ भवं, कारणं ब्रह्मेत्यर्थः।। २८ ।।

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुनसंवादे अक्षरब्रह्मयोगो नाम अष्टमोऽध्यायः।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ
श्रीमद्भगवद्गीताभाष्ये अष्टमोऽध्यायः।।